**दिनाङ्क :- 17.07.2025** **प्रातः - 06:55**

**मन्त्रीमण्डलीय-निर्णयः**

केन्द्रीय-मन्त्रिमण्डलेन कृषि-उत्पादकतायाः समेधनार्थं प्रधानमन्त्री-धनधान्य-कृषि - योजनायै सहमतिः प्रकटिता। अस्याः योजनायाः उद्देश्यानि सस्य-विविधीकरणम्, स्थायी-कृषिपद्धतीनां समेधनम्, भण्डारण-क्षमतायाः सम्वर्द्धनम्, सेचनसुविधासु परिष्कारः, ऋणोपलब्धतायाः सरलीकरणम् इत्यादीनि सन्ति। अनेन देशे सप्ततिलक्षाधिक-एककोटिमिताः कृषकाः साहाय्यं प्राप्स्यन्ति । मन्त्रिमण्डलस्तरीयोपवेशनानन्तरं गतदिने नवदिल्ल्यां मीडिया-कर्मिभ्यः विज्ञापयन् सूचनाप्रसारणमन्त्री अश्विनी-वैष्णवः प्रोक्तवान् यत् अस्याः योजनायाः अन्तर्गतं देशे शतजनपदानां अवलोकनं विधास्यते। इमे जनपदाः अल्पोत्पादकतायाः, अल्प-सस्यगहनतायाः, अल्प-ऋण-वितरणस्य चोपरि आधारिताः भविष्यन्ति।

श्रीवैष्णवेन एतदपि विज्ञापितं यत् मन्त्रिमण्डलेन अन्तरिक्षयात्रिणः शुभांशु- शुक्लस्य अन्तरिक्ष-यात्रायाः प्रशंसा कुर्वता कश्चन प्रस्तावोऽपि पारितः। तेनोक्तं यत् शुभांशु-शुक्लस्य अन्तरिक्षाभियानेन भारतस्य अन्तरिक्ष-स्थानकस्य निर्माणाय कश्चन पदक्षेपः सन्धारितः । श्रीवैष्णवेन कथितं यत् मन्त्रिमण्डलेन भारतीय-अन्तरिक्षानुसन्धान-सङ्घटनस्य सहैव वैज्ञानिकानां अभियान्त्रिकसमुदायस्य चापि प्रशंसा विहिता।

--------

**अमितशाह-जयपुरयात्रा**

केन्द्रीय-गृह-सहकारितामन्त्री अद्य जयपुरयारायां भविष्यति। श्रीशाहः जयपुरसमीपवर्तिनि दादियाग्रामे आयोज्यमाने सहकारिता-उद्योगोत्सवे भागं भजिष्यति। अवसरेऽस्मिन् सः विशालजनसभामपि सम्बोधयिष्यति। अवधेयं यत् श्रीशाहः अत्रावसरे प्रशासकीय-सेवायां चितेभ्यः अष्टसहस्र--प्रत्याशिभ्यः नियुक्तिपत्राणि अपि प्रदास्यति।

--------

**सर्वदलीयोपवेशनम्**

संसदः मॉनसूनसत्रात् प्राक् भारतसर्वकारेण रविवासरे सर्वदलीयोपवेशनम् आहूतम्। अस्मिन्नुपवेशने सर्वकारः संसदः उभयोः सदनयोः सुचारुसञ्चालनाय सर्वेषां राजनैतिकदलानां सहयोगं याचिष्यति। सत्रमिदं अस्य मासस्य एकविंशति-दिनाङ्कादारभ्य आगामिमासस्य एकविंशतिदिनाङ्कं यावत् प्रवर्तिष्यते। अस्मिन् सत्रे बहूनां महत्त्वपूर्णविधेयकानां विषये चर्चा भविष्यतीति सम्भाव्यते।

--------

**बिहार-निगडनम्**

बिहारे केन्द्रीयान्वेषणाभिकरणेन अभियुक्तात् द्विलक्षरुप्यकाणां वञ्चनायै आयकरविभागस्य त्रयः अधिकारिणः निगडिताः। एतस्मिन् तावत् सहायक निदेशकः,आयकरनिरीक्षकः,मल्टीटास्किंग-कार्यकर्ता इतीमे सम्मिलिताः आसन्। केन्द्रीयान्वेषणाभिकरणेन गतदिने एव एतेषां विरुद्धं प्रकरणं पञ्जीकृतम्।

--------

**इज़राइली-आक्रमणम्**

इज़राइलीरक्षाबलैः दमिश्कस्थितस्य सीरियाशासनस्य सैन्यमुख्यालयं लक्षीकृत्य आक्रमणं कृतम्। इज़राइलीविमानैः दक्षिण-सीरियायां स्वेदा-क्षेत्राभिमुखं गच्छन्ति प्रक्षेपकयन्त्राणि, सशस्त्रयानानि च लक्षीकृतानि । सीरियायाः स्वास्थ्य-मन्त्रालयेन उक्तं यत् एतेषु आक्रमणेषु एकः नागरिकः मृत्युमुपगतः, अष्टादशजनाः व्रणिताः समभवन् ।

**क्रीकेट्स्पर्धा**

भारतेन साउथेम्प्टननगरे इंग्लैण्डदलं चतुर्भिः स्तोभैः पराजित्य एकं- शून्यं इत्यङ्कान्तरालेन विजयं सम्प्राप्तम्। भारतीय-महिलादलेन गतरात्रौ त्रिस्पर्धात्मक-श्रृंखलायां प्रथमा एकदिवसीय-स्पर्धा विजिता। आदौ क्रीडयता इंग्लैण्डदलेन भारतस्य सम्मुखे एकोनषष्ट्यधिक-द्विशतधावनाङ्कानां लक्ष्यं संस्थापितम्। पञ्चाशत्क्षेपणचक्रेषु षड्क्रीडकानां हानौ इंग्लैण्डदलेन अष्टपञ्चाशदधिक-द्विशतधावनाङ्काः समर्जिताः। प्रत्युत्तरे भारतेन अष्टचत्त्वारिंशत्-दशमलव-द्विक्षेपणचक्रेषु द्विषष्ट्यधिक-द्विशतधावनाङ्काः सम्प्राप्य विजयं स्वायत्तीकृतम्।

॥ इति वार्ता:॥